# संस्कृतम्

## (209)

## मूल्यांङ्कनपत्रम् - I

## (पाठाः प्रथमतः दशमपर्यन्तम्)

पूर्णांकाः - 25

**निर्देशाः** (i) सर्वे प्रश्नाः अनिवार्याः। सर्वेषां प्रश्नानाम् अङ्काः समानाः ।

(ii) उत्तरपुस्तिकायां प्रथमपृष्ठे स्वनाम, अनुक्रमांकसंख्या, शिक्षणकेन्द्रस्य नाम, विषयस्य नाम इति सर्वम् लेखनीयम्।

**1.** कयोश्चित् द्वयोः प्रश्नयोः उत्तरं पञ्चाशतशब्देषु (50) लिखत

(क) 'प्रेरणा' पाठात् पञ्च भविष्यत्कालिकक्रियापदानि चित्वा स्ववाक्येषु प्रयोगं कुर्वन भवान्/भवती किं-किं करिष्यति इति वर्णयतु।

(ख) भवान् / भवती स्वमातुः कृते, स्वपितु व कृते, स्व-आचार्यस्य च कृते किं किं करोति इति ''सदाचार'' पाठम् अधिकृत्य वर्णयतु।

(ग) भवान् / भवती वानरस्य मनोभावान् वर्णयतु, यदा सः मकरेण वञ्चितः अभवत्।

**2.** कयोश्चिद् द्वयोः प्रश्नयोः उत्तंर पञ्चाशतशब्देषु (50) वर्णयत

(क) ''यक्ष-युधिष्ठिरसंवाद'' पाठात् पञ्च विशेषणपदानि पञ्च विशेष्यपदानि च चित्वा लिखत।

(ख) आत्मानं 'भीमसेन' इति मत्वा 'मातुराज्ञागरीयसी' इति पाठस्य सारांशं लिखत।

(ग) पञ्च वाक्येषु आर्यभट्ट गणितज्ञस्य योगदानं वर्णयत।

**3.** दश वाक्येषु (200 शब्देषु) कमपि एकं प्रश्नम् उत्तरत

(क) कुक्कुटस्य, कुक्कुरस्य, सिंहस्य, गर्दभस्य, अश्वस्य चित्राणि संगृह्य प्रत्येकम् अधिकृत्य वाक्यद्वयं लिखत।

(ख) अधोलिखित-दश-अव्ययपदानि स्ववाक्येषु प्रयुञ्जीत

अधः, उपरि, अग्रे, पृष्ठे, उभयतः परितः, शनैः-शनैः, बहिः, अन्तः, विना।

**4.** कमपि एकं प्रश्नं दशवाक्येषु अथवा 200 शब्देषु उत्तरत

(क) भवान् / भवती प्रजापतिः अस्ति। भवत्समक्षम् प्राणः इन्द्रियाणि च आगच्छंति। विवादं च कुर्वन्ति। भवान् / भवती कथं तेषां निर्णयं करिष्यति इति दशवाक्येषु वर्णयत।

(ख) अधोलिखितक्रियापदानां कर्तृपदानि चित्वा लिखत। चलन्ति, करिष्यति, उपशाम्यति, कुप्यति, आप्नोति, इच्छति, स्फीयते, व्याहरन्ते, वदन्ति, नास्ति।

**5. परियोजनाकार्यम्**

(i) अधोनिखितानि पञ्च मूल्यानि अधिकृत्य पञ्च-पञ्च सुभाषितानां/सूक्तीनां/पद्यानां सङ्कलनं कुरुत

सत्यम्, विद्या, धैर्यम्, क्षमा, परोपकारः

(ii) किशोरबालिकानां शिक्षायाः महत्त्वम् अधिकृत्य दश वाक्यानि लिखत, यथाशक्ति चित्राणि अपि रचयत।

# संस्कृतम्

## (209)

## मूल्यांङ्कनपत्रम् - II

## (पाठाः एकादशतः विंशतिपर्यन्तम्)

पूर्णांकाः - 25

**निर्देशाः** (i) सर्वे प्रश्नाः अनिवार्याः। सर्वेषां प्रश्नानाम् अङ्काः समानाः ।

(ii) उत्तरपुस्तिकायां प्रथमपृष्ठे स्वनाम, अनुक्रमांकसंख्या, शिक्षणकेन्द्रस्य नाम, विषयस्य नाम इति सर्वम् लेखनीयम्।

**1.** कयोश्चित् द्वयोः प्रश्नयोः उत्तंर पञ्चाशतशब्देषु (50) लिखत

(क) अधोलिखितकथनानि कः कं प्रति कथयति?

(i) रात्रौ एव गम्यतां किञ्चिन्निकटं सरः।

(ii) ममाप्यभीष्टमेतत्।

(iii) श्वः प्रभाते आगत्य मत्स्यसंक्षयं करिष्यामः।

(iv) तदहं न यास्यामि।

(v) न युक्तं साम्प्रतं क्षणमप्यत्र अवस्थातुम्।

(ख) अयोध्यां कुरू वैदेहि! इति पाठात् तृतीयान्तपदानि चित्वा लिखत।

(ग) सिद्धान्तशिरोमणि- ग्रन्थस्य वैशिष्ट्यं पञ्च वाक्येषु लिखत।

**2.** कयोश्चिद् द्वयोः प्रश्नयोः उत्तरं पञ्च वाक्येषु लेखनीयम्

(क) 'अनुक्तमपि' इति पाठे निम्नलिखित- सर्वनामपदानि केषां स्थाने प्रयुक्तानि?

(i) अयं **मम** सभायाः श्रीवृद्धिं करोतु।

(ii) अहमपि कविभिः सह मिलित्वा सभायाः श्रीवृद्धिं करिष्यामि।

(iii) कवे! स्वागतं **ते** ।

(iv) **त्वया** किम् अधीतम्?

(v) **उभौ** गच्छन्तं पुत्रं पश्यतः ।

(ख) अधोलिखितानाम् एकैकं वैशिष्ट्यं लिखत

पन्नगः, चन्द्रमाः, मेघः, शूलपाणिः, गंगा।

(ग) पत्रेषु प्रयोजनीयानि पञ्च सम्बोधनवचनानि पञ्च अभिवादनवचनानि च लिखत।

**3.** कस्यचिद् एकस्य प्रश्नस्य उत्तरं दशवाक्येषु लिखत

अधोलिखितानां पदानां नूतनेषु स्वरचितवाक्येषु प्रयोगं कुरुत (करुणापरा हि साधवः)

अभिरुह्य, अवरुध्य, संचूर्ण्य, विलोक्य, प्राप्य, प्रारब्धः, भीता, आगतानि, आपन्नः, गताः

**अथवा**

स्वास्थ्यरक्षार्थं किं-किं करणीयम् इति दश वाक्येषु वर्णयत।

**4.** आत्मानं खरनखरं सिंहं मत्वा पुनः सम्पूर्णकथां लिखत।

**अथवा**

कीदृशं दानं सात्त्विकं कीदृशं च राजसिकं, तामसिकञ्च कथ्यते? शारीरे तपसि वाङ्मये तपसि च कः भेदः?

**5.** **परियोजनाकार्यम्**

(i) पञ्चानां संस्थानां लक्ष्यवाक्यानि संगृह्य तेषां वर्णनं कुरुत यथा राष्ट्रियमुक्त विद्यालयी शिक्षा संस्थानस्य लक्ष्यवाक्यम् अस्तिविद्याधनं सर्वधनप्रधानम्।

(ii) विविधमादक द्रव्याणां दोषान् अधिकृत्य सुभाषितानां/सूक्तीनां सङ्कलनम् कुरुत। रेखाचित्राणि च रचयत।

# संस्कृतम्

## (209)

## मूल्यांङ्कनपत्रम् -III

## (पाठाः एकविंशतितः द्वात्रिंशत् पर्यन्तम्)

पूर्णांकाः - 25

**निर्देशाः** (i) सर्वे प्रश्नाः अनिवार्याः । सर्वेषां प्रश्नानाम् अङ्काः समानाः ।

(ii) उत्तरपुस्तिकायां प्रथमपृष्ठे स्वनाम, अनुक्रमांकसंख्या, शिक्षणकेन्द्रस्य नाम, विषयस्य नाम इति सर्वम् लेखनीयम्।

**1.** कयोश्चित् द्वयोः प्रश्नयोः उत्तरं पञ्चाशतशब्देषु लिखत

(क) आदिशंकराचार्यस्य जीवनपरिचयं लिखित्वा स्थापितानि पीठानि भारतस्य मानचित्रे प्रदर्शयत

(ख) अधोलिखितवाक्येषु सर्वनामपदानि कस्यै प्रयुक्तानि

(i) अस्तु एनमेव संभावयामि

(ii) तद् **वः** धिग् **अस्मान्** च धिक्

(iii) यं निरीक्ष्य एव ममाङ्गेषु आलिंगनस्य अभिलाष उत्पद्यते - - -

(iv) आयुष्मन्। एष प्राप्ताः वयम्।

(ख) अधोलिखितपंक्तिषु कर्तृपदानि रेखाङ्कितानि कुरुत

(i) मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे।

(ii) देवा भागं यथा पूर्वे संजानाना उपासते।

(iii) समानमस्तु वो मनः।

(iv) मित्रस्य चक्षुषा सर्वाणि भूतानि समीक्षन्ताम्

(v) संगच्छध्वं संवदध्वम् (

**2.** कयोश्चिद् द्वयोः प्रश्नयोः उत्तरं पञ्चवाक्येषु लेख्यम्

(क) अहंकारी जनः कथं व्यवहारं करोति इति पञ्चवाक्येषु लिखत।

(ख) जलस्य संरक्षणम् अधिकृत्य भवान् किं किं करिष्यति?

(ग) गुरूपदेशस्य महत्त्वम् अधिकृत्य पञ्चवाक्यानि लिखत।

**3.** अधोलिखितानि पदानि बहुवचने परिवर्त्य लिखत

तव, शिरः शिंशपातरौ, राज्ञः, कथाम्, शिंशपातरुः, शाखायाम्, कस्मात्, त्वम्, अहम्

**अथवा**

बालगंगाधरतिलकस्य चरित्रचित्रणं दशवाक्येषु कुरुत।

**4.** कण्वस्य तपोवने शकुन्तलायाः विरहे अधोलिखितानां कीदृशी अवस्था जाता?

(i) मृगीनाम्,

(ii) मयूराणाम्,

(iii) लतानाम्,

(iv) अनसूयायाः

**अथवा**

भारतस्य पञ्चनदीनां नामानि लिखित्वा तासाम् उद्गमस्थलं वर्णयत।

**5. परियोजनाकार्यम्**

(i) भारतस्य मानचित्रे दर्शयत

हिमालयः, विन्ध्याचलः, ऋष्यमूकः, चित्रकूटः, गंगा, शतद्रुः, यमुना, सरयूः, गोदावरी,

(ii) पार्श्वस्थं कमपि उद्यानं गत्वा तस्य वर्णनं दशवाक्येषु कुरुत।